च चन्द्रे। आषाढशुक्ले निखिलं विचिन्त्य योऽस्मिन् विशे षमवधेहि प्रयत्नात्। स्वातौ निशांशे प्रथमेऽभिवृष्टे शस्यानि सर्वाण्युपयान्ति वृद्धिम्। भागे द्वितीये तिलमुद्गमाषा ग्रैष्मं तृतीयेऽस्ति न शारदानि। वृष्टेऽह्नि भागे प्रथमे सुवृष्टि- स्तद्द्वितीये तु सकीटसर्पा। वृष्टिस्तु मध्यापरभागवृष्टे निश्छिद्रवृष्टिर्द्युनिशं प्रवृष्टे। समस्तदोषा गणिता वि(?)- शाखाः कीर्त्यते स्वातिफलं पशूनाम्(?)। तस्मासमे चन्द्रे स्वाते- योगः शिवो भवति। सप्तम्यां स्वातियोगे यदि पतति हिमं माघमासान्धकारे वायुर्वा चण्डवेगः सजलजल- धरो वापि गर्जत्यजस्रम्। विद्युन्मालाकुलं वा यदि भवति नभो नष्टचन्द्रार्कतारं विज्ञेया प्रावृडेषा मुदित- जनपदा सर्वशस्यैरुपेता। तथैव फाल्गुने चैत्रे वैशा- खस्यासितेऽपि वा। स्वातियोगं विजानीयादाषाढे च विशेषतः"। [सेट्। स्वादते अस्वादिष्ट।

**स्वाद** प्रीतौ अक० प्रीणने लेहने च सक० भ्वा० आ०

**स्वाद** पु० स्वद-स्वाद-वा घञ्। १रसानुभवे २प्रीतौ ३प्रीणने ४लेहने च। ल्युट्। स्वादनमप्यत्र न०। रसानुभवप्रकारः सा० द० उक्तो यथा

"न जायते तदास्वादो विना रत्यादिवासनाम्" वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः। तत्र यदि आद्या न स्याच्छ्रोत्रियजरन्मीमांसकादीनामपि स स्यात्। यदि द्वितीया न स्यात् यद्रागिणामपि केषाञ्चिद्रसोद्बोधो न दृश्यते तन्न स्यात्। उक्तञ्च धर्म- दत्तेन "सवासनानां सभ्यानां रसस्यास्वादनं भवेत्। निर्वासनास्तु रङ्गान्तःकाष्ठकुड्याश्मसन्निभाः"।

**स्वादिष्ठ** त्रि० अतिशयेन स्वादुः। इष्ठन् टिलोपः। अतिमधुरे ईयसुन्। स्वादीयस् तत्रार्थे त्रि० स्त्रियां ङीप्।

**स्वादु** पु० स्वद-उण्। १मधुररसे हेमच० २गुडे त्रिका० ३जीवकौषधौ जटा०। ४इष्टे ५मधुरे ६मनोज्ञे च त्रि० मेदि० स्त्रियां वा ङीप्। सा च ७द्राक्षायां अमरः दन्त्यादिकमारे गन्धद्रव्ये पु० राजनि०।

**स्वादुकण्टक** पु० स्वादुः कण्टकोऽस्य। विकङ्कतवृक्षे राजनि०

**स्वादुकन्दा** स्त्री स्वादुः कन्दोऽस्याः। विदार्य्याम् राजनि०।

**स्वादुका** स्त्री स्वादुना मधुररसेन कायति कै-क। नाग- दन्त्याम् राजनि०। [१मधुरे भागे।

**स्वादुखण्ड** न० स्वादुः मिष्टः खण्डोऽस्य। गुडे शब्दर० करक०।

**स्वादुगन्धा** स्त्री स्वादुरिष्टगन्धोऽस्याः। १रक्तशोभाञ्जने रत्नमा०। २भूमिकुष्माण्ड्याञ्च जटा०।

**स्वादुपर्णी** स्त्री स्वादूनि पर्णान्यस्याः ङीप्। दुग्धिकायाम् राजनि०।

**स्वादुपाका** स्त्री स्वादुः पाकोऽस्याः। काकमाच्याम् राजनि०

**स्वादुपिण्डा** स्त्री स्वादुः पिण्डः पिण्डाकारफलमस्याः। पिण्डखर्जूर्य्याम् राजनि०।

**स्वादुफला** स्त्री स्वादु फलमस्याः। १बदरीफले शब्दर० करक०। २मिष्टे फले न०। ३कोलौ स्त्री शब्दर० टाप्।

**स्वादुमज्जन्** पु० स्वादुः मज्जा यस्य। पर्वतजे पीलौ जटा०

**स्वादुमांसी** स्त्री स्वादु मांसमिव फलमस्याः गौरा० ङीष्। काकोल्याम् राजनि०।

**स्वादुमूल** न० स्वादु मूलमस्य। गर्जरे (गाँजर) राजनि०।

**स्वादुरसा** स्त्री स्वादुः रसो यस्याः। १काकोल्याम् अमरः २मदिरायाम् हेमच०। ३शतावर्य्यां ४द्राक्षायाम् ५आम्रा- तके च शब्दर०।

**स्वादुलता** स्त्री स्वाद्वी लता। विदार्य्याम् राजनि०।

**स्वादुपुष्प** पु० स्वादु पुष्पं यस्य। कटभ्यां राजनि०।

**स्वादूदक** पु० स्वादु उदकं यस्य। समुद्रभेदे सि० शि०।

**स्वाद्वम्ल** पु० स्वादुः अम्लः। दाडिमे त्रिका०।

**स्वाधिष्ठान** न० लिङ्गमूलस्थे सुषुम्नान्तर्गते षड्दलपद्मभेदे। "षड्दले वैद्युतनिभे स्वाधिष्ठानेऽनलत्विषि। बभमैर्यरलै- र्युक्ते वर्णैः षड्भिश्च सुव्रत!" तन्त्रसा०। "सिन्दूरपूर- रुचिरारुणपद्ममन्यत् सौषुम्नमध्यघटितं ध्वजमूलदेशे। अङ्गच्छदैः परिवृतं तडिताभवर्णैर्बाद्यैः सबिन्दुलसितैश्च पुरन्दरान्तैः (लान्तैः)। तस्यान्तरे प्रविलसद्विशदप्रकाशम- म्भोजमण्डलमथो वरुणस्य तस्य। अर्द्धेन्दुरूपलसितं शर- दिन्दुशुभ्रं वङ्कारबीजममलं मकराधिरूढम्। तस्याङ्कदेश- लसितो हरिरेव पायान्नीलप्रकाशरुचिरश्रियमादधानः। पीताम्बरः प्रथमयौवनगर्वधारी श्रीवत्सकौस्तुभधरो धृतवेदबाहुः। अत्रैव भाति सततं खलु राकिणी सा नीलाम्बुजद्युतिसहोदरकान्तिशोभा। नानायुधोद्यतकरै- र्ललिताङ्गलक्ष्मीर्दिव्याम्बराभरणभूषितमत्तचित्ता। स्वाधि- ष्ठानाख्यमेतत् सरसिजममलं चिन्तयेद्यो मनुष्यस्तस्या- हङ्कारदोषादिकसकलरिपुः क्षीयते तत्क्षणेन" पूर्णानन्द- षट्चक्रम्।

**स्वाधीन** त्रि० स्वस्याधीनः। स्वायत्ते स्वतन्त्रे।

**स्वाधीनपतिका** स्त्री स्वाधीनः पतिर्यस्याः कप्। नायि- काभेदे स्वाधीनभर्तृकाद्योऽप्यत्र।

"कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम्। वि-